M. T. B. COLLEGE, SURAT

Manuscripts Library

No. Ref.
Ser. 1276

Title: Chatur Hulas
Chitr Mantra

Satre

1276

In Complete

Chatur Hotra Chiti Mantra			Title
			Author
			Editor
81C			Year, Vols.
			Publisher
1276			Remarks

॥श्रीगणेशायनमः यस्यनिश्वसितंवेदायोवेदेभ्योखिलंजगत् निर्ममेतमहंवंदे विद्यातीर्थमहेश्वरं।
स्वाध्यायब्राह्मणंप्रोक्तंद्वितीयेहिप्रपाठके चातुर्होत्रचितिर्मंत्रावक्ष्यंतेस्मिंस्तृतीयके ब्राह्मणग्रंथस्य
तृतीयकांडेद्वादशप्रपाठकेब्रह्मवैचतुर्होतारइत्यस्मिन्ननुवाकेचातुर्होत्रचितिब्राह्मणमुक्तंनतुमंत्रा
स्तत्रोक्ताः तेषामरण्येध्येतव्यत्वात् अतोस्मिन्प्रपाठकेतन्मंत्राउच्यंते तत्रप्रथमानुवाकोक्त
मंत्राणांविनियोगोब्राह्मणएवसमाम्नाताः पुरस्ताद्दशहोतारमुदंचमुपदधातियावत्पदमिति तत्
प्रपाठस्थ चित्तिःस्रुक् चित्तमाज्यंवाग्वेदिः आधीतंबर्हिः केतोअग्निः विज्ञातमग्निः वाक्पतिर्होता
मनउपवक्ताप्राणोहविः सामाध्वर्युरिति आदौसिसृक्षुःप्रजापतिः सृष्ट्यर्थंकेनविद्यायोगेनाध्या
त्मिकेनेष्टवान् तद्यागवर्तिनःस्रुगादयः एतेषुमंत्रेषुप्रतिपाद्यंते अत्रचित्तिचित्तशब्दाभ्यां
निर्विकल्पकसविकल्पभेदजनकांतःकरणवृत्तिभेदौविवक्षितौ वाक्प्रसिद्धा अधीतमु ॥२॥
च्चार्यमाणंकेतविज्ञातशब्दाभ्यांनिर्विकल्पकसविकल्पकज्ञानविषयानभिधीयते वाक्पतिशब्दे
नवाचःप्रवर्तकःकंठताल्वादिषुस्थानेषुसंयुज्यमानोवायुरुच्यते मनःप्राणौप्रसिद्धौ सामश

ब्देनतद्धेतुस्वरोच्चारणशक्तिरुच्यते एवंचित्यादयोदशशरीरगताःपदार्थविशेषाःस्रुगादयोदशपदा
र्थाहोमनिष्पादकाः अग्निशब्दद्वयेनाहवनीयगार्हपत्यौविवक्षितौ उपवक्तृशब्देनानुवचनकर्तु
र्त्तातुःपुराप्रेषवक्तामैत्रावरुणोविवक्षितः यद्वाप्रोक्षणादिष्वनुज्ञायांपृष्टायांब्रह्मासमीपस्थितः
ओंप्रोक्षेत्यादिनातदनुज्ञांवक्तितस्मादयमुपवक्ताइत्यादयोदशशरीरपदार्थास्रुगादिरूपाइतिवाक्यार्थः
अस्मिन्मंत्रेस्रुगादीहोमसाधनानांदशानामभिहितत्वाद्दयंमंत्रोदशहोतेत्युच्यते सायंमंत्रस्यपू
र्वभागः तस्यचावयवाःपृथगिष्टकामंत्राः तत्रचित्तिस्रुक्यावद्दशतयांगिरस्वद्ध्रुवासीदेत्येवमुपधा
नप्रकारोद्रष्टव्यः एतादृशाइष्टकोपधेयाः मंत्रस्यायमुत्तरभागोग्रहाख्यस्तेनग्रहेष्टकामुपध्या
त् तथाचब्राह्मणेसमाम्नातं यथावकाशंग्रहानिति तंचग्रहमाह वाचस्पतेविधेनामन् वि
धेमतेनामविधेस्त्वमस्माकंनाम वाचस्पतिःसोमंपिबतु अस्मास्वनृम्णंधात्स्वाहेति हेवाच
स्पतेतेनामविधेम अस्मदनुग्रहाकारीदेवोयमितिप्रसिद्धिंकुर्मः यद्वा अनमनंप्रह्वाभावंसं
पादयामः त्वमप्यस्माकंनामविधेःदेवेषुमध्येयजमानोयंयथाशास्त्रंहुतवानितिप्रसिद्धिंकुरु॥
अयंवाचस्पतिःमदीयेषुयागेषुसोमसदृशमाज्यंपिबतु अस्मास्वहोमकर्तृषुनृम्णंधनमाधा

चित्ति॰ ॥२॥ त्संपादयतु इमं दत्तानमुद्दिश्य जुहुधीति स्वकीयां वाचमाह अत्र वाचस्पत इत्यादिस्वाहेत्यंता ग्रह
णावाः एतेषां मंत्राणामुपधाने विनियोगः प्रकरणसिद्धः चातुर्होत्रब्राह्मणवाचनिकवदितरे तु
विनियोगास्तत्र तत्र वाचनिकाः तेच ब्राह्मणस्य द्वितीयकांडे द्वितीयतृतीयप्रपाठकयोः प्रपंचि
ताः तेषु होमविषयभेदेन कश्चिद्विशेष आपस्तंबेन दर्शितः यत्र होमार्थाः संग्रहाः सस्वाहा
कारा यत्र होमार्था अग्रहा अस्वाहाकारा इति अयं न्यायः उत्तरेष्वपि मंत्रेष्वनुसंधेयः तदेव
मस्मिन्ननुवाके दशहोतृमंत्रोऽभिहितः इति माधवीये वेदार्थप्रकाशे यजुरारण्यके तृतीयप्रपा
ठके प्रथमोऽनुवाकः अथ चतुर्होतृमंत्र उच्यते तस्य च विनियोगो ब्राह्मणेनैवाभिहितः दक्षि
णतः प्राचं चतुर्होतारमिति तत्पाठस्तु पृथिवी होता द्यौरध्वर्युः रुद्रोऽग्नीत् बृहस्पतिरुप
वक्तेति सोयं होतृभागः तत्र पृथिव्यादयः प्रसिद्धाः तथा होत्रादयः उपवक्तृशब्देन समी
पे स्थित्वा तत्तत्कर्मस्वनुज्ञानानो ब्रह्मा विवक्षितः अथ ग्रहमाह वाचस्पते वाचो वीर्येण सं ॥२॥
भृततमेनायक्ष्यसे यजमानाय वार्यं आसुवस्करस्मै वाचस्पतिः सोमं पिबतु जजनदि
द्रमिंद्रियाय स्वाहेति हे वाचस्पते अत्यंतं संपादितेन मंत्रात्मिकाया वाचः सामर्थ्येनासमंता

द्यक्ष्यसे अस्मै यजमानाय वार्यं वरणीयं स्कुवः स्वर्गमाकरस्मै आसमंतात्कुरु अयं वाचस्पतिः अस्म
दीयेषु सोमं पिबतु इंद्रं देवं इंद्रियसमृध्यर्थं जजनत् जनयतु प्रेरयत्वित्यर्थः तदेतदुद्दिश्य जुहु
धीति स्वकीयां वाचमाह इति माधवीये वेदार्थप्रकाशे यजुरारण्यके तृतीयप्रपाठके द्वितीयोऽनुवाकः ॐ
अथ पंचहोतृमंत्र उच्यते तद्विनियोगो ब्राह्मण एव समाम्नातः पश्चादुदंचं पंचहोतारमिति त
त्पाठस्तु अग्निर्होताऽश्विनाध्वर्यू त्वष्टाऽग्नीत् मित्र उपवक्तेति अग्न्यादयः प्रसिद्धाः अ
ध्वर्युः प्रतिप्रस्थाता चेति अध्वर्युद्वैधेन होतृपंचकं पूरणीयं अथ ग्रहमाह सोमः सोमस्य पुरोगाः
शुक्रः शुक्रस्य पुरोगाः श्रातास्त इंद्र सोमाः वातापेर्हवनश्रुतः स्वाहेति योयं देवतात्मकः सोमः
सोयं लतात्मकस्य सोमस्य यागदेशं प्रत्यागमने पुरतो गच्छति शुक्रो नामको देवतादिप्रकाशको
मंत्रः शुक्रस्य गृह्यमाणतया भासमानस्य सोमस्य पुरतो गच्छति आदौ मंत्रं पठित्वा पश्चात्सोमा
गृह्यंते इंद्र ते त्वदर्थं एते सोमाः श्राताः पक्वाः आश्रिता वा कीदृशस्त्वं वायुवदाप्नोति सहस
मागच्छतीति वातापिः तस्य हवनमाह्वानं शृणोतीति हवनश्रुत् तस्य एतदर्थं जुहुधीति स्वकी

त्रिति०
॥३॥

याचागाह इतिमाधवीयेवेदार्थप्रकाशेयजुरारण्यकेतृतीयप्रपाठकेतृतीयोनुवाकः अथषड्ढो
तृमंत्रउच्यते द्विविधस्तन्मंत्रःअस्मिंश्चानुवाकेप्रोक्तः सूर्यंतेचक्षुरित्येकः वाग्घोतेत्यपरः स
एवचातुर्होत्रचयनेप्रयोक्तव्यः वाग्घोताषड्ढोतृणामित्येवब्राह्मणेनिर्देशात् सूर्यंतेचक्षुरित्यस्य
पशुबंधादौविनियोगः सचचातुर्होत्रब्राह्मणकांडेपठ्यतेपशुबंधेनयक्ष्यमाणः षड्ढोतारंमनसा
नुद्रुत्याहवनीयेजुहुयादिति तन्मंत्रपाठस्तु सूर्यंतेचक्षुः वातंप्राणः द्यां पृष्ठंअंतरिक्षमा
त्मा अंगैर्यज्ञं पृथिवीं शरीरैरिति हेपशोयोयंसूर्यःसतेचक्षुः योवायुःसतेप्राणः तथा
चपशुविषयेध्रिगुप्रैषेसमाम्नाते सूर्यंचक्षुर्गमयतात् वातंप्राणमन्ववसृजतादिति या
वाद्यौःसपृष्ठभागः उपरिवर्तित्वसाम्यात् यदिदमंतरिक्षंततत्वदीयोजीवात्मामध्यवर्तित्व
साम्यात् यानिहृदयादीन्यंगानितैर्यज्ञंसंपादयसीतिशेषः यान्यन्यान्यस्थ्यादीनिशरीरगता ॥३॥
नितैःपृथिवींप्राप्नुहीतिशेषः सूर्यंतेचक्षुरित्यादावपित्वदीयंचक्षुःसूर्यंप्राप्नोतितिवायोजनी
यं अथवावक्ष्यमाणेवानस्पतिसंबोधनेनघटते चक्षुःसूर्यरूपंजानीयादित्येवंवानस्पति

परतयामंत्रोयोज्यः होमनिष्पादकस्यपशोःचक्षुरादीनिषडंगान्यत्रोक्तानीत्यस्यमंत्रस्यषड्ढोतृत्वं यं
थग्रहणभागमाह वाचस्पतेऽछिद्रयावाचा अछिद्रयाजुह्वा दिविदेवावृधंहोत्रामेरयस्वस्वाहेति हे
वाचस्पतेअछिद्रयावाचास्वराक्षरसंपूर्णेनमंत्रेण अछिद्रयाजुह्वाघृतसंपूर्णयास्रुचा देवावृधं
देवानांवर्धयित्रीं होत्रांहोमक्रियांदिविद्युलोकेएरयस्वसर्वतःप्रेरय एतमर्थंजुहुधीतिस्वकीयो
वागाह इतिमाधवीयेवेदार्थप्रकाशेयजुरारण्यकेतृतीयप्रपाठकेचतुर्थोनुवाकः अथस
प्तहोतृमंत्रउच्यते तस्यचविनियोगोचातुर्होत्रब्राह्मणएवंसमाम्नातः उपरिष्टात्सांवत्सरंसप्त
होतारमिति तत्पाठस्तु महाहविर्होता सत्यहविरध्वर्युः अच्युतपाजाअग्नीत् अच्युतम
नाउपवक्ता अनाधृष्यश्चाप्रतिधृष्यश्चयज्ञस्याभिगरौ अयास्यउद्गातेति महाहविःसत्य
हविरित्यादयोयास्यांताःसप्तसंख्याकाःमहर्षयः तन्महर्षिस्वरूपाअत्रत्याहोत्रादयः यज्ञ
स्यसोमयागस्याभिगरोअभितः उद्गातुःपुरस्तात्पश्चाद्यज्ञगृहीतप्रस्तारप्रतिहारभागौगो
पतइतिप्रस्तोतृप्रतिहर्तारावभिगरौ होताध्वर्युराग्नीध्रोब्रह्माप्रस्तोताप्रतिहर्तोद्गातेतिसप्त

चित्ति॰ ॥५॥

संख्याकाहोमनिष्पादकाअत्रोक्ताइत्ययंमंत्रःसप्तहोतेत्युच्यते अथग्रहभागमाह वाचस्पते हृ
द्विधेनामन् विधेमतेनाम विधेस्त्वमस्माकंनाम वाचस्पतिःसोमपात् मादैव्यस्तंतुश्छेदिमामे
नुष्यः नमोदिवे नमःपृथिव्यैस्वाहेति हेवाचस्पते हृद्विधे हृदयस्यविधातः चित्तप्रेरकेत्यर्थः ॥
हेनामन् सर्वजगत्संबंधिप्रामाण्ययुक्त तेतुभ्यंनमः नमनंप्रणतिंविधेम कुर्मः त्वंचास्माकंनाम
विधेः देवानामध्येसम्यग्यष्टवानितिप्रसिद्धंनामधेयंकुरु अयंवाचस्पतिःसोममपात् पीतवा
न् दैव्यस्तंतुर्मद्धेहहविःस्वीकारार्थमागतोदेवसंबंधिसंतानोमाच्छेदिकदाचिदपिविच्छिन्नोमाभू
त् तथामनुष्यः तंतुः आधिक्यप्रवाहोपिविच्छिन्नोमाभूत् द्यावापृथिवीभ्यांनमोस्तु इममर्थंउदि
श्यजुहुधीतिस्वकीयावागाह   इतिमाधवीयेवेदार्थप्रकाशेयजुरारण्यकेतृतीयप्रपाठकेपंच
मोनुवाकः अथद्वितीयःषड्ढोतृमंत्रउच्यते तस्यचविनियोगोचातुर्होत्रब्राह्मणएवसमाम्ना ॥५॥
तः उत्तरतःप्रांचंषड्ढोतारमिति तत्राऽस्त, वाग्घोता दीक्षापत्नी वातोध्वर्युः आपोभि
गरः मनोहविः तपसिजुहोमीति येयंयजमानस्यवाक्होतृस्थानीया येयंदीक्षासापत्नीस्था

नीया योयंवातः प्राणरूपः सोध्वर्युः याःप्रोक्षणाद्यर्थाआपः ताः अभिगरोब्रह्मस्थानीया अभितो
गिरतिकर्तव्यमनुजानातीत्यभिगरः यन्मनस्तद्धविःस्थानीयं तपस्यग्निस्थानीयेतन्मनोहविर्जु
होमिस्थापयामि अत्रवागादीनांषण्णांहोत्रादिरूपेणहोमनिष्पादकानांअभिधानात्षड्ढोतृत्वं अ
थग्रहभागमाह भूर्भुवःसुवः ब्रह्मस्वयंभु ब्रह्मणेस्वयंभुवेस्वाहेति यतोभूरादयस्त्रयोलोकाः
तेषांयत्कारणंस्वयंभुस्वतःसिद्धंपरब्रह्मतस्मैस्वयंभुवेपरब्रह्मणेजुहुधीतिस्वकीयावागाह ॥ ॥
इतिमाधवीयेवेदार्थप्रकाशेयजुरारण्यकेतृतीयप्रपाठकेषष्ठोनुवाकः अनंतरभाविनोनुवाक
स्यचातुर्मास्येषुकेशानिवर्तनेषुतद्व्रतंतत्सत्यमितिजपित्वापश्चात्क्षेपणमापस्तंबआह ब्राह्मण
एकहोतेतिचानुवाकंइति तथाब्रह्ममेधेउद्वर्तनमेक्षणस्यानुमंत्रणेविनियोगंभरद्वाजमाह ॥
ब्राह्मणएकहोतेतिचेति तदनुवाकोक्तेषुदशसुपर्यायेषुप्रथमंपर्यायमाह ब्राह्मणएकहोता
सयज्ञः समेददातुप्रजांपशून्पुष्टिंयशः यज्ञश्चमेभूयादिति योयंवेदविद्ब्राह्मणःसायं
मेकेनस्वकीयतपसाजुहोतिसर्वस्यजगतउपकरोतीत्येकहोता सएवज्योतिष्टोमादिनिष्पा

चित्ति०
॥५॥

दकत्वाद्यज्ञरूपश्चयज्ञस्यहोताब्राह्मणोमेमधंप्रजादिचतुष्टयंददातु तत्प्रसादाद्यज्ञोपिमेसर्वदाप्रभू
यात् अथद्वितीयपर्यायमाह अग्निर्द्विहोता सभर्त्ता समेददातुप्रजांपशून्पुष्टिंयशः स
र्त्ताचमेभूयादिति द्वाभ्यांपाकहविर्हविर्याभ्यामुपकरोतीतिद्विहोता अतएवपोषकत्वाद्भर्त्ता अग्न्य
त्र्वेवव्याख्येयं अथतृतीयमाह पृथिवीत्रिहोता सप्रतिष्ठा समेददातुप्रजांपुष्टिंपशून्पुष्टिं
यशः प्रतिष्ठाचमेभूयात्इति त्रिभिरग्न्यन्नयोगैरुपकरोतीतित्रिहोतृत्वं सर्वप्राण्याधार
त्वेनप्रतिष्ठात्वं अथचतुर्थमाह अंतरिक्षंचतुर्होता सविष्ठाः समेददातुप्रजांपशून्
पुष्टिंयशः विष्ठाचमेभूयादिति चतुर्भिर्दिग्भिर्व्याप्यावकाशस्यानेरुपकरोतीतिचतुर्होतृत्वं
जपगंधर्वादीनामाश्रयत्वाद्विविधस्थितिहेतुत्वं अथपंचममाह वायुःपंचहोता सप्राणः। ॥५॥
समेददातुप्रजांपुष्टिंपशून्पुष्टिंयशः प्राणश्चमेभूयादिति पंचभिःप्राणवृत्तिभिःउपकरोती
तिपंचहोतृत्वंवायोः वायोःप्राणरूपत्वंप्रसिद्धं अथषष्ठमाह चंद्रमाःषड्होता सऋतून्कल्प
यति समेददातुप्रजांपशून्पुष्टिंयशः ऋतवश्चमेकल्पतां षण्णांऋतूनांनिष्पादकत्वे

नषड्होतृत्वं चंद्रमाअपिवृद्धिक्षयाभ्यांशुक्लकृष्णपक्षद्वाराऋतून्कल्पयति अजा— न्यत्राम्ना
तं ऋतूनृत्वोविदधज्जायतेपुनरिति अथसप्तममाह अन्नंसप्तहोता सप्राणस्यप्राणः
समेददातुप्रजांपशून्पुष्टिंयशः प्राणस्यचमेप्राणोभूयादिति सप्तानांशीर्षण्यानांप्राणवृत्ति
नांपोषकत्वेनसप्तहोतृत्वं अतएवप्राणपोषकत्वात्प्राणस्यप्राणइत्युच्यते अथाष्टममाह द्यौ
रष्टहोता सोनाधृष्यः समेददातुप्रजांपशून्पुष्टिंयशः अनाधृष्यश्चभूयासमिति आ
स्य रोगादिभिःकल्पपतिरष्टभिःस्वधैरुपकरोतीतिअष्टहोतृत्वं द्युलोकस्यकेनापिनिराकर्तुमश
क्यत्वादनाधृष्यत्वं अथनवममाह आदित्योनवहोता सतेजस्वी समेददातुप्रजांपशून्पु
ष्टिंयशः तेजस्वीचभूयासमिति पूर्वोक्तैरष्टभिर्मतिभिस्तत्रानुगतेनसामान्यरूपेणनवधो
पकारान्नवहोतृत्वं तेजस्वित्वंचादित्यस्यप्रसिद्धं अथदशममाह प्रजापतिर्दशहोता स
इदंसर्वं समेददातुप्रजांपशून्पुष्टिंयशः सर्वंचमेभूयात् नववै पुरुषेप्राणानाभि
र्दशमीतिश्रुतानिशरीरगतानिदशछिद्राण्युत्पाद्योपकरोतीतिदशहोतृत्वं सर्वजगत्कारण

चिति० ॥६॥

त्वेन सर्वात्मकत्वं प्रजापतेः प्रसिद्धं इति माधवीये वेदार्थप्रकाशे यजुरारण्यके तृतीयप्रपाठके सप्त
मोनुवाकः अथ संभारयजूंषि उच्यंते तेषां चेष्टकोपधाने विनियोगश्चातुर्होत्रब्राह्मणेभिहितः
हृदयं यजूंषि पत्न्यश्चेति तेषामेकविंशतिसंख्यानां यजुषां पाठस्तु अग्निर्यजुर्भिः सविता
स्तोमैः इंद्र उक्थामदैः मित्रावरुणावाशिषा अंगिरसो धिष्णियैरग्निभिः मरुतः सदोहवि
धानाभ्यां आपः प्रोक्षणीभिः ओषधयो बर्हिषा अदितिर्वेद्या सोमो दीक्षया त्वष्टेध्मेन वि
ष्णुर्यज्ञेन वसव आज्येन आदित्या दक्षिणाभिः विश्वेदेवा ऊर्जा पूषा स्वगाकारेण बृहस्पतिः
पुरोधया प्रजापतिरुद्गीथेन अंतरिक्षं पवित्रेण वायुः पात्रैः अहं श्रद्धयेति अत्राग्नि
सवित्रादयो देवाः यजुः स्तोमादीनि यज्ञसंभरणीयान्यंगानि एतैर्देवाः ते संभरणीयैः सहा
स्मिन् कर्मण्यागच्छंत्विति वाक्यार्थः उक्थामदाः स्तोत्रवाचियज्ञशब्दो हविःप्रक्षेपवाची अ ॥६॥
हं यजमानः श्रद्धया सह गच्छामि सत्यमन्यत् इति माधवीये वेदार्थप्रकाशे यजुरारण्यके
तृतीयप्रपाठकेऽष्टमोनुवाकः अथ देवपत्न्याख्या मंत्रा उच्यंते तेषां च विनियोगः पूर्ववद्

द्रष्टव्यः पत्न्यश्चेत्यत्रवर्तीरिष्टकानामभिधानात्पाठस्तु सेनेंद्रस्य धेना बृहस्पतेः पथ्या पूष्णः वाग्वा
योः दीक्षा सोमस्य पृथिव्यग्नेः वसूनां गायत्री रुद्राणां त्रिष्टुक् आदित्यानां जगती विष्णोरनु
ष्टुप् वरुणस्य विराट् यज्ञस्य पंक्तिः प्रजापतेरनुमतिः मित्रस्य श्रद्धा सवितुः प्रसूतिः सूर्य
त्रै स्य मरीचिः चंद्रमसो रोहिणी ऋषीणामरुंधती पर्जन्यस्य विद्युत् चतस्रो दिशः चतस्रोऽवांतर
दिशः अहश्च रात्रिश्च कृषिश्च वृष्टिश्च त्विषिश्चापचितिश्च आपश्चौषधयश्च ऊर्क्
सूनृता च देवानां पत्न्य इति देवजातानींद्रादयः पतयः सेनादयः पत्न्यो दिग्विदिगादयोपि
केषांचिद्देवानां पत्न्यः एताः सर्वाः समागत्य यज्ञमविलं कुर्वंत्विति वाक्यार्थः अत्राम्नातैः ष
ड्विंशतिवाक्यैः षड्विंशतिसंख्याकाः पत्नीष्टका उपदध्यात् इति माधवीये वेदार्थप्रका
शे यजुरारण्यके तृतीयप्रपाठके नवमोनुवाकः अथ प्रतिग्रहमंत्रा उच्यंते तेषां प्र
तिग्रहेष्टकोपधाने चातुर्होत्रीयब्राह्मण एव समाम्नातं यथावकाशं प्रतिग्रहो लोकंपृणा
श्चेति तत्र प्रथमं मंत्रमाह देवस्य त्वा सवितुः प्रसवे अश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यां प्र

त्रि० ॥७॥ तिगृह्णामि राजात्वावरुणोनयतुदेविदक्षिणेग्नयेहिरण्यं तेनामृतत्वमश्यां वयोदात्रेमयोमह्यम॰
स्त्वप्रतिग्रहीत्रे कइदंकस्माअदात् कामःकामायकामोदाता कामःप्रतिग्रहीताकामंसमुद्र॰
माविश कामेनत्वाप्रतिगृह्णामिकामैतत्ते एषांतिकामदक्षिणाउत्तानस्त्वांगीरसःप्रतिगृह्णाति॰
तिगृह्यमाणद्रव्यस्यसवितुःदेवस्यप्रेरणेसतिअश्विसंबंधिबाहुद्वाभ्यांपूषसंबंधिभ्यांहस्ता
भ्यांत्वांप्रतिगृह्णामिहेदेविवरुणोराजाहिरण्यरूपांत्वांअग्नयेप्रापयतु तेनाग्निप्रापणेनप्र
तिग्रहदोषाभावादहममृतत्वंनरकाभावरूपंअश्यांप्राप्नुयां इयंचदक्षिणादात्रेवयोस्तु॰
पक्षिरूपत्वाद्दातारंस्वर्गंनयत्वित्यर्थः प्रतिग्रहीत्रेमह्यंमयःसुखमस्तु इदंद्रव्यंप्रजापतिः॰
प्रजापतयेअदातदत्तवान् अंतर्यामिरूपेणदातृप्रतिग्रहीत्रोःप्रेरकत्वात् तथाकामःका
मायदत्तवान् यथाप्रजापतिरदृष्टःप्रेरकस्तथाकामस्यदृष्टप्रेरकत्वात् तस्मात्कामएवदा ॥७॥
ताप्रतिग्रहीताच स्वर्गादिफलविषयःकामोदाता ऐहिकसुखविषयःकामःप्रतिग्रहीताच।
ततोहेदक्षिणेसमुद्रसमंकामंप्रविश कामेननिमित्तेनत्वांप्रतिगृह्णामि हेमह्यदस्यचंत्रि

कामतदेतद्द्रव्यंतुभ्यंभवति हेकामत्वदर्थमेवैषादक्षिणादेयेत्ता अंगिरोगोत्रसमुत्पन्नोउत्ताना॰
ख्योमहर्षिःत्वांप्रतिगृह्णातु अथ वस्त्रादिद्रव्यविषयान्षोडशमंत्रानाह सोमायवासःरुद्रा॰
यगांवरुणायाश्वंप्रजापतयेपुरुषंमनवेतल्पंत्वष्ट्रेअजांपूष्णेअविंनिर्ऋत्याअश्वतरगर्दभौ हिमवतोह॰
स्तिनंगंधर्वाप्सराभ्यःस्रगलंकरणेविश्वेभ्योदेवेभ्योधान्यंवाचेन्नं ब्रह्मणओदनंसमुद्रायापः
उत्तानायांगीरसायानःवैश्वानरायरथमिति एतेषुसर्वेषुमंत्रेषुदेविदक्षिणइत्यंतःपूर्वानुषं
गः तेनामृतत्वादिकमित्युत्तरानुषंगः तस्यरथप्रतिग्रहमंत्रस्यशेषभूतामुत्तरानुषंगात्पूर्वभा
विनींकांचिदृचमाह वैश्वानरःप्रत्नथानाकमारुहत् दिवःपृष्ठंभंदमानःसुमन्मभिःसपूर्व
ज्जनयज्जंतवेधनं समानमज्मापरियातिजागृविरिति वैश्वानराख्योदेवःप्रत्नथापुरात
नशरीरधारीसन्स्वर्गमारूढवान् सचदिवःपृष्ठंद्युलोकस्योपरिभागमन्मभिःमननविशेषैः
भंदमानःकल्याणंकुर्वन्वर्तते अयंयजमानःइमांदक्षिणांदत्तवानित्येवंदेवानामग्रेस्मा
रयतीत्यर्थः सवैश्वानरःजंतवेप्राणिरूपाययजमानायधनंपूर्ववज्जनयत्यजमानःसुरा

चित्ति०
॥८॥

यथादक्षिणांदत्तवान्तथैवतदनुरूपंफलंजनयति सवैश्वानरोजागृविःसावधानःसन् अ
ज्मास्वर्गगमनशीलःपरियातियावद्दक्षिणार्थंद्रव्यंतेनसदत्तंतद्योग्यंफलंपरिप्रापयति अस्या
ऋचपरितनंरथंप्रतिग्रहेष्वेमंत्रशेषमाह राजात्वावरुणोनयतुदेविदक्षिणेवैश्वानरायर
थं तेनामृतत्वमश्यां वयोदात्रेमयोमह्यमस्तुप्रतिग्रहीत्रेकइदंकस्माअदात् कामःका
मायकामोदाताकामःप्रतिग्रहीताकामंसमुद्रमाविशकामेनत्वाप्रतिगृह्णामिकामैतत्ते॥
एषातेकामदक्षिणाउत्तानस्त्वांगीरसःप्रतिगृह्णात्विति अत्रतेनामृतत्वमश्यामित्यादिरु
त्तरानुषंगःसर्वमंत्रसाधारणइतिदर्शयति प्रथममंत्रेपठितोपिपुनराम्नातःराजात्वेत्यादि
वैश्वानरायरथमित्यंतःपूर्वोक्तायाःऋचःउपरिरथमंत्रेपुनःपठनीयइत्येतान्विशेषः।
एतैर्मंत्रैःप्रतिग्रहेष्टकाउपदध्यात् इतिमाधवीयेवेदार्थप्रकाशेयजुरारण्यकेतृतीय ॥८॥
प्रपाठकेदशमोनुवाकः अथहोतृहृदयाख्यमंत्राअभिधीयंते तेषामिष्टकोपधाने
विनियोगश्चातुर्होत्रब्राह्मणएवसमाम्नातः हृदयंयजुःषिपत्न्यश्चेति तत्रदशहो

तृहृदयाख्यंमंत्रमाह सुवर्णंघर्मंपरिवेदवेनं इंद्रस्यात्मानंदशधाचरंतं अंतःसमुद्रेमनसाचरंतं ब्रह्मा
न्वविंददशहोतारमर्णे अंतःप्रविष्टःशास्ताजनानां एकःसन्बहुधाविचारः शतंशुक्राणियत्रैकंभवति॥
सर्वेवेदायत्रैकंभवंति सर्वेहोतारोयत्रैकंभवंति समानसीनआत्माजनानां अंतःप्रविष्टःशास्ताजनानांसर्वा
त्मा सर्वाःप्रजायत्रैकंभवंति चतुर्होतारोयत्रसंपदंगच्छंतिदेवैः समानसीनआत्माजनानामिति चित्तिःस्रु
गित्यादीनांहोतृमंत्राणांहृदयरहस्यतत्वंपरमात्मस्वरूपंप्रतिपादयतित्वयमनुवाकोहृदयमित्युच्यते तत्रअ
नेनमंत्रेणदशहोतृहृदयंपरमात्मतत्वमुच्यते अहंमंत्रद्रष्टाइंद्रस्यपरमेश्वरस्यात्मानंनिजस्वरूपंपरिवे
द परितःसर्वत्रावस्थितंजानामि किंदशमात्मानंसुवर्णंसुवर्णसदृशंयथासुवर्णंस्वतएवभासमानंभवति॥
तथास्वयंप्रकाशं घर्मंअन्यस्यवस्तुनोदीपकं तस्यभासासर्वमिदंविभातीतिश्रुतेः वेनंकांतंसर्वेदुःखरा
हित्येनतस्यकमनीयत्वं दशधाचित्तिःस्रुगित्यादिदशहोतृमंत्रप्रतिपाद्यैराकारैःचरंतंलोकेव्यवहरंतं॥
अंतःसमुद्रेब्रह्मांडस्रष्टेःपुरासर्वत्रव्याप्यावस्थितोयोयंजलसंघःसोयंसमुद्रःतस्यमध्येमनसाचरंतंइदं
सर्वंजगत्स्रक्ष्येयमित्येवंरूपेणमनोवृत्तिविशेषेणसहप्रवर्तमानं अतएवान्यत्रोक्तं आपोवाइदमासंत्स
लिलमेवसप्रजापतिरेकःपुष्करपर्णेसमभवत् तस्यांतर्मनसिकामःसमवर्ततेदंसृजेयमिति ब्रह्मा

चिति॰ ॥९॥ चतुर्मुखःप्रजापतिःअर्णेअर्णवेयथोक्तसमुद्रेदशहोतारंदशहोतृमंत्राःप्रतिपाद्यरूपेणाविर्भूतंपरमात्मानंभ
न्वविंदन्सृष्टिसाधनत्वेनान्विष्यलब्धवान् तथाचब्राह्मणेसमाम्नातं प्रजापतिरकामयत प्रजाःसृजेयेतिस
एतंदशहोतारमपश्यदिति सोयमेवंविधःपरमात्माजनानांसर्वेषांशास्ताअंतर्यामिरूपेणनियामकःसन्हृद
येप्रविश्यावस्थितः तथाचस्मर्यते ईश्वरःसर्वभूतानांहृद्देशेर्जुनतिष्ठति भ्रामयन्सर्वभूतानियंत्रारूढा
निमाययेति सचांतर्यामिस्वकीयेनेश्वररूपेणैकएवसन् पुनर्जीवरूपेणबहुधाभूत्वाविचारःविविधच
रणवान्भवति अतएवान्यत्रोपनिषदिश्रूयते एकएवहिभूतात्माभूतेभूतेव्यवस्थितः एकधाबहुधा
चैवदृश्यतेजलचंद्रवदिति शतंशुक्राणिशतसंख्योपलक्षितान्यनंतानिसूर्यचंद्रनक्षत्राणिज्योतीं
य षियत्रास्मिन्परमात्मनिएकीभवंति एकत्वंप्राप्नुवंतितथासर्वेवेदाः ऋग्वेदप्रभृतयश्चत्वारोवेदाना
नाविधशाखोपेताःविलीययस्मिन्नेकीभवंति होतारश्चहोमकर्तारःसर्वेयजमानादशहोत्रादिमंत्रा
वायस्मिन्परमात्मन्येकत्वंप्राप्नुवंति यथाबुद्बुदाजलमध्येसमुत्पद्यकिंचित्कालमवस्थायविलीयमा ॥९॥
नाजलएवैक्यंप्राप्नुवंतितथासर्वेभावाःपरब्रह्मणिएवोत्पद्यतत्रैवस्थित्वाविलीयमानाएकतांगच्छंति।
अतएवोपनिषदिश्रूयते यतोवाइमानिभूतानिजायंतेयेनजातानिजीवंति यत्प्रयंत्यभिसंविशंति।

तद्विजिज्ञासस्व तद्ब्रह्मेति सतादृशईश्वरःसर्वेषांजनानामात्मा स्वरूपभूतःसन्मानसीनःयोगयुक्तेनमनः
सोपलभ्योभवति तथाचकठाधीयंते मनसैवेदमाप्तव्यंनेहनानास्तिकिंचनेति ततोयोगिनांमानसप्रत्यक्षग
म्यत्वात्अंतःप्रविष्टःशास्ताजनानामितियोयमुक्तःसोयंसर्वात्मासर्वेषांप्राणिनामात्मास्वरूपभूतःसर्वेहिजनाःयो
गेननिरुद्धचित्ताःसंतोजगदीश्वरंस्वस्वस्वरूपत्वेनैवसाक्षात्कुर्वंतिनतुभेदेनपश्यंति अतःपूर्वोक्तोर्थःउपपन्नइ
त्युपसंह्रियते सर्वाःप्रजाःदेवमनुष्यादयोयत्रयस्मिन्योगिप्रत्यक्षगम्येचैतन्यैकरसेपरमात्मन्येकीभवंति॥
चतुर्होतृमंत्राश्चसर्वेपियस्मिन्नुक्तप्रतिपाद्यैर्देवैःसहयस्मिन्ब्रह्मणिसंपदंसम्यगेकीभावंप्राप्नुवंति सतादृ
शोब्रह्मस्वरूपोमानसीनोमानसप्रत्यक्षःसर्वेषांजनानामात्मा ऋचांभेदात्पुनरुक्तिर्द्रष्टव्या द्वितीयाद्विपदा
इतरातिस्रश्चतुष्पदाइतिऋचांविवेकः अत्रचतुर्होतृशब्देनदशहोत्रादयःसर्वेपिमंत्राविवक्ष्यंते तथाचब्राह्म
णेचतुर्होतृदेवंप्रतिप्रजापतिर्वरंदत्तवान् त्वंवैमेनेदिष्ठंहूतःप्रत्यश्रौषीःत्वयैनानाख्यातारइति तस्मा
न्नैनांश्चतुर्होतारइत्याचक्षतेइतितरंदेवदशहोतृहृदयाख्योमंत्रोभिहितः अथचतुर्होतृहृदयाख्योमंत्रो
भिधीयते तत्रतिस्रऋचस्तासुप्रथमामाह ब्रह्मेंद्रमग्निंजगतःप्रतिष्ठां दिवआत्मानंसवितारंबृहस
तिं चतुर्होतारंप्रदिशोनुक्लृप्तं वाचोवीर्यंतपसान्वविंददिति ब्रह्माचतुर्मुखः इंद्रःपरमैश्वर्ययुक्तःपरमा

चि॰नि॰ ॥१०॥

त्मानं तपसान्वविंददन्विष्यलब्धवान् तद्दर्शपूर्णमासयज्ञसिद्धिसाधनं किमिति विचार्य चतुर्होतृमंत्ररूपेणावस्थितं पर
मात्मानं निश्चितवानित्यर्थः तथा च ब्राह्मणमाम्नायते प्रजापतिरकामयत दर्शपूर्णमासौ सृजेयेति स एतं चतुर्हो
तारमपश्यदिति कीदृशमिदं जगतः प्रतिष्ठां अग्निं सर्वस्य जगत आधाररूपो योयं चचातुर्होत्रीयचितिरूपोग्नि
स्तत्स्वरूपं दिव आत्मानं सवितारं द्युलोकस्य प्रकाशकत्वेनात्मवदवस्थितो यः सविता तद्रूपं तथा बृहस्पतिर्यो
यं देवगुरुस्तद्रूपेणावस्थितं प्रदिशः सर्वानपि प्रदेशाननुक्रम्य सर्वेषु प्रदेशेष्ववस्थितं चतुर्होतारं पृथिवीहो
त्रेत्यादिवं मंत्रस्वरूपं वाचो वीर्यं सर्वस्या रूपायाः वाचः सारभूतं अथ द्वितीयामृचमाह अंतः प्रविष्टं कर्तारमे
तं त्वष्टारं रूपाणि विकुर्वंतं विपश्चिं अमृतस्य प्राणं यज्ञमेतं चतुर्होतॄणामात्मानं कवयो निचिक्युरिति कव
यो विद्वांसो वेदशास्त्रपारगताश्चतुर्होतॄणां चतुर्होतृशब्देनाभिधीयमानानां सर्वेषां होतृमंत्राणां आत्मानं स्व
रूपभूतं परमेश्वरं निचिक्युर्निश्चितवंतः कीदृशमात्मानं अंतः प्रविष्टं जीवरूपेण शरीरेषु प्रविश्यावस्थि
तं अत एवाम्नायते अनेन जीवेनात्मनानुप्रविश्येति कर्तारमेतमित्यनेन मानसप्रत्यक्षेण प्रतीयमानो लौ ॥१०॥
किकवैदिकसर्वक्रियानिष्पादकं एतच्चान्यत्राम्नातं एष हि द्रष्टा स्प्रष्टा श्रोता घ्राता रसयिता मंता बोद्धा क
र्ता विज्ञानात्मा पुरुष इति रूपाणि विकुर्वंतं गर्भेषु देहादित्येंडजानुव्यादिरूपाणि विविधं निष्पादयंतं त्वष्टारं

त्वष्टृदेवस्वरूपं एतच्चाम्नातं यावच्छो वै रेतसः सिक्तस्य त्वष्टा रूपाणि विकरोति तावच्छो वै तत्प्रजायत इति विपश्चिं
विपश्चितं तद्रूपनिर्माणप्रकाराभिज्ञं अमृतस्य प्राणं मरणरहितस्य परमात्मनो व्यवहारहेतुभूतप्राणोपाधिस्व
रूपं एतच्चाथर्वणिका आमनंति कस्मिन्नहमुत्क्रांत उत्क्रांतो भविष्यामि कस्मिन्प्रतिष्ठिते प्रतिष्ठास्यामीति स प्राणमसृज
तेति यज्ञमेव सर्वैरनुष्ठीयमानत्वेन दृश्यमानमेतं दर्शपूर्णमासयज्ञस्वरूपं चतुर्होतृमंत्रस्य यज्ञसिद्धिसाध
तं नत्वात्तद्रूपत्वं युक्तं तद्यज्ञसाधनत्वं ब्राह्मणे समाम्नातं स एतं चतुर्होतारमपश्यत् तं मनसानुद्रुत्याहवनीये
जुहोत् ततो वै स दर्शपूर्णमासावसृजतेति अथ तृतीयामाह अंतः प्रविष्टं कर्तारमेतं देवानां बंधुं निहि
तं गुहासु अमृतेन क्लृप्तं यज्ञमेतं चतुर्होतॄणामात्मानं कवयो निचिक्युरिति योयं परमात्मा सोयं देवानां
बंधुवत्प्रियः तादृशं तेषु पक्षपातत्वेन विजयहेतुत्वं नलदकारा आमनंति ब्रह्म देवेभ्यो विजिग्य इति।
गुहासु बुद्धिषु निहितं साक्षित्वेनावस्थितं यो वेद निहितं गुहायामित्यादिश्रुतेः अमृतेन स्वर्गफलनिमित्ते
न क्लृप्तं संपादितं एतं यज्ञमित्येवं नामेति अथ पंचहोतृहृदयाख्यामन्त्र उच्यते तत्र तिस्र ऋचस्तासु प्र
थमामाह शतं नियुतः परिवेद विश्वा विश्ववारः विश्वमिदं वृणाति इंद्रस्यात्मा निहितः पंचहोता॥
अमृतं देवा मायुः प्रजानां इति पंचहोता अग्निर्होतेत्यादि पंचहोतृमंत्रस्वरूप आत्मा स विश्ववारः स

ना

चित्रि० वैर्वरुणीयोवायुरूपःसन्शतंनियुतःशतंसंख्याकान्स्वकीयान्निश्वासान्परिवेदपरितःसंचारित्वंजानाति अ
॥११॥ तएवविश्वमिदंजगद्गृह्णातिव्याप्नोति सोयमिंद्रस्यात्मापरमेश्वरस्वरूपभूतःसन्निहितःसर्वत्रावस्थितः स
र्चंद्रिवानाममृतंप्रजानांयुप्रयच्छतीतिशेषः अथद्वितीयामाह इंद्रंराजानंसवितारमेतं वायोरात्मानंक
यो वंनिचिक्युः रश्मिंरश्मीनांमध्येतपंतं ऋतस्यपदेकवयोनिपांतीति एवंचतुर्होतृदेवंकवयःपंडिताः
निचिक्युःनिश्चितवंतः इंद्रंपरमैश्वर्ययुक्तं राजानंदीप्यमानं सवितारंप्रेरकं वायोरात्मानंस्वरूपभूतं ते
कवयःएतंचतुर्होतृदेवंऋतस्यपदेब्रह्मणःस्थानेनिपांतिनि तरांपालयंतितद्रूपत्वेनपश्यंतीत्यर्थः कीदृशं।
रश्मीनांदृश्यमानानांकिरणानांमध्येस्थित्वातपंतंजगतस्तापंकुर्वंतं रश्मिंप्राग्रश्मिरूपमादित्यमित्यर्थः॥
अथतृतीयमाह यंआंडकोशेभुवनंबिभर्ति अनिर्भिण्णसन्नथलोकान्विकान्पिचष्टे यस्यांडकोशंशु
ष्ममाहुःप्राणमुल्बं तेनक्लृप्तोमृतेनाहमस्मीति यःपंचहोतृदेवःआंडकोशेब्रह्मांडमध्ये अनिर्भिण्णः
सन्अभेदेनावस्थितःसन्भुवनकृत्स्नंभूतजातंबिभर्तिधारयति अथब्रह्मांडःभेदानंतरंतदंतस्थितान् ॥११॥
भूरादिलोकान्विचष्टेविशेषणप्रख्यापयति यस्यचतुर्होतृरूपस्यपरमात्मनःअंडकोशंशुष्मंप्रबलं॥
ब्रह्मांडावकाशंस्थप्राणवायुविशेषेउल्बमाहुःगर्भवेष्टनस्थानीयमाह यथालोकेगर्भःउल्बेनवेष्टिततथा

सत्रात्माशरीरेणप्राणवायुनाब्रह्मांडविष्टितंभवति तेनामृतेनपंचहोतृरूपेणपरमात्मनाहंक्लृप्तोव्यवहारसमर्थ
त्वेनोसादितोस्मि अथषड्ढोतृमंत्रः तत्रप्रथमामाह सुवर्णंकोशंरजसापरिवृतं देवानांवसुधानींविराजं अमृ
तस्यपूर्णंतामुकलांविचक्षते पादंषड्ढोतुर्न किलाविवित्स इति वाघ्योतेतिमंत्रोत्रषड्ढोतासचब्रह्मांडकोशम
ध्येचंद्ररूपेणावस्थितः तंचंद्ररूपंषड्ढोतृदेवंकवयोभिज्ञाः सुवर्णत्वादिगुणयुक्तमाचक्षते सुवर्णंशोभनव
र्णोपेतंचंद्रमंडलंहिरमणीयवर्णोपेतंभासते कोशंब्रह्मांडकोशमध्यगं रजसारंजनात्मकेनामृतेनपरीतं
सर्वताव्याप्तंतथाविधंचंद्रंतामुकलांतादृशीमिवभासरूपामाचक्षते कीदृशीमितितदुच्यते देवानांवसुधानीव
ह्निरव्यादीनांदेवतानामपेक्षितंयद्वसुअमृतरूपंतस्यधारयित्री अतएवस्मर्यते प्रथमांपिबतेवह्निर्द्वितीं
यांपिबतेरविरित्यादिविराजं विशेषेणराजमानं अमृतस्यपूर्णांपीयूषेणपरीतं एवंरूपंषड्ढोतृदेवमभिज्ञा
आचक्षते प्राकृतजनस्तुषड्ढोतुःपादंषड्ढोतृदेवस्यांशभूतंचंद्रंनकिलाविवित्सेनैवजानाति अथद्वितीया
माह येनर्तवःपंचधोतक्लृप्ताः उतवाषड्धामनसोतक्लृप्ताः तंषड्ढोतारमृतुभिःकल्पमानं ऋतस्यपदेकवयो
निपांतीति येनचंद्रेणषड्ढोतृदेवेनवसंताद्यृतवःपंचप्रकाराःक्लृप्ताःसंपादिताःहेमंतशिशिरयोःसमासे
नपंचत्वंउतवाषड्धाअथवाहेमंतशिशिरयोर्विभागेनषट्प्रकाराःक्लृप्ताः उतअपिचमनसाक्लृप्ताः संक

त्रि॰

॥१२॥ ल्पमात्रेणसंपादिताः तंचंद्ररूपंषड्ढोतारंदेवंक्रतुभिःकल्प्यमानं पंचधाषोढावा त्रिधावसिष्ठादिभिःसर्वव्यव
हारसमर्थस्यक्रतस्यपदेसत्यस्यपरब्रह्मणःस्थानेकवयोवेदरहस्याभिज्ञाःनिपातिनितरांपालयंति परब्रह्मै
क्यात्संचंद्ररूपःषड्ढोतेत्येवमुपासतइत्यर्थः अथतृतीयामाह अंतःप्रविष्टंकर्तारमेतं अंतश्चंद्रमसिम
नसाचरंतं सहैवसंतंनविजानंतिदेवाः इंद्रस्यात्मानंशतधाचरंतमिति देवाःसर्वेसहैवसंतंस्वकीयेहृद
येस्थिताजीवात्मनासहैवावस्थितं एवंषड्ढोतारंदेवंपरमात्मेननविजानंति वेदांताभ्यासमंतरेणहृदयस्थि
तोयंपरमात्मैवेतिविशेषेणनजानंति कीदृशंपरमात्मानंअंतःप्रविष्टंअंतर्यामिरूपेणसर्वेषांपृथिव्यादिप
दार्थानांमध्येवस्थितं एतच्चवाजसनेयिनोऽन्तर्यामियःपृथिव्यांतिष्ठन्इत्यादिनाबहुप्रपंचेनाभामनंति कर्ता
रंनियामकत्वेनसर्वस्यनिष्पादकं अंतश्चंद्रमसिचंद्रमंडलमध्येमनसासंकल्पमात्रेणचरंतं एतच्चोपलक्षणं
सर्वेष्वपिवस्तुषुचरंतंइत्यर्थः एतदेवस्पष्टीकर्तुंशतधाचरंतमित्युक्तं इंद्रस्यपरमैश्वर्ययुक्तंदेवादेरात्म
भूतंस्वरूपभूतं अथसप्तहोतृहृदयाख्योमंत्रः तत्रप्रथमामृचमाह इंद्रोराजाजगतोयईशे सप्तहोता ॥१२॥
सप्तधाविक्लृप्तइति महाहविर्होतेत्याद्यमंत्रः सप्तहोतासचसप्तधाविक्लृप्तः होत्रध्वर्युप्रमुखैःसप्तभिःप्रका
रैःसंपादितःसकिंरूपइतितदुच्यते इंद्रःपरमैश्वर्ययुक्तःराजादीप्यमानोयःपरमात्माजगतईशेस्वामीभ